P 9720
73164

॥ श्री जिनायनमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

# ॥ सुभद्राचरित्रं ॥

( कर्ता—श्रीशुभशीलगणि )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीजैनभास्करोदय प्रिन्टिंग प्रेस—जामनगर.

सने १९२९ मूल्य रु. ०-८-० सां. १९८६

Serving JinShasan
073164
gyanmandir@kobatirth.org
P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

॥ श्री जिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीसुभद्राचरित्रं प्रारभ्यते ॥

( कर्ता–श्रीशुभशीलगणी )

छपावी प्रसिद्ध करनार–पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

शीलं पालयतां पुंसां । शुद्धभावेन संततं ॥ वशीभवंति गीर्वाणाः । सुभद्राया इवाचिरात् ॥ १ ॥

वसंतपुराख्ये नगरे जितशत्रुनामा राजा राज्यं करोतिस्म. तस्य नृपस्य जैनधर्मपालको जिनमतिनामा श्रेष्ठी मंत्रिप्रवरो विद्यते, तस्य च परमार्हती श्राविका तत्त्वमालिनीनाम्नी प्रियास्ति. तयोः शुभस्वप्न सूचिता सुभद्राख्या पुत्री बभूव. क्रमेण संप्राप्तयौवना सा देवांगनेवातिमनोहररूपलावण्यधारिणी यूनां मनांसि व्याकुलयामास. सर्वकलाकलिताऽसौ जैनधर्मैकलीनमानसा सर्वदा देवपूजा गुरुभक्ति प्रतिक्रमणादिका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्यदक्षा बभूव. अथ स जिनमतिः श्रेष्ठी तां निजसुतां सुभद्रां केनचिज्जैनधर्मविदा पुरुषेण सह परिणाययितुं समीहते. अथान्यदा चंपापुरवास्तव्यो बौधधर्मवासितांतःकरणो बुद्धदासाख्यो युवा व्यापारी व्यापारार्थं तत्र वसंतपुरनगरे समाययौ. तत्र स विविधक्रयाणकव्यापारं कुर्वन् भूरिधनं समर्जयतिस्म. अथैकदा स बुद्धदासो मार्गे व्रजंतीं, सखीसमूहोपेतां, रूपनिर्जितसुरांगनां च तां सुभद्रां विलोक्य मदनातुरः कंचिन्नरं पप्रच्छ, भो पुरुषोत्तम! कस्येयं पुत्री ! च सा विवाहितास्ति.? वा कुमारिकास्ति.? तेनोक्तं भो बुद्धदास! इयं जिनमत्यभिधस्य श्रेष्ठिनः सुभद्राख्या तनया वर्तते, किंच साद्यापि कुमारिकैवास्ति. तस्या जनकश्च तां जैनधर्मविदा शुद्धश्रावकेण सहैव परिणाययितुं समीहते, नान्यस्य परधर्मिणः कस्यापि पुरुस्य स निजपुत्रीं दास्यति. तत् श्रुत्वा स बुद्धदासो दध्यौ, अथाहं कथंचिदपि जैनीभूयैतां परिणयामि, यतो मे मानसं तस्यामेव विलग्नमस्ति. जैनीभूतं च मां विलोक्य स जिनमतिश्रेष्ठ्यपि सुखेनेमां निजपुत्रीं सुभद्रां दास्यति. इति विचिंत्य स बुद्धदासो जिनधर्मसंबंधिशास्त्राणि पठित्वा सामायिकप्रतिक्रमणादि जैनधर्मक्रियासु कुशलो बभूव. एवं शुद्धां श्राद्धसामाचारीं शिक्षयित्वा सुश्राधीभूय स जिनमंदिरेषु गत्वा विधिना



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

देवपूजां करोति, ततो धर्मशालायां गत्वा जैनमुनिपार्श्वे धर्मशास्त्रश्रवणं करोति. एवं नित्यं धर्मक्रियां कुर्वंतं तं तादृशं सुश्रावकं विलोक्य स जिनमतिः श्रेष्ठी निजगृहे देवपूजाद्यर्थमाकारयामास. एवं श्रेष्ठिसमाहूतः स बुद्धदासस्तत्र श्रेष्ठिगृहेऽभ्येत्य यतनापूर्वकं निजशरीरं प्रक्षाल्य चंदनशतपत्रादिभिर्जिनबिंबानि पूजयामास, ततो मधुरस्वरैर्निजहृदयात् कृत्रिमं शुद्धभावं दर्शयन् स जिनेशानां स्तवनं चकार. ततश्चात्याग्रहपूर्वकं श्रेष्ठिना भोजनाय निवेशितः स बुद्धदासः भोजनं परिवेषयतः श्रेष्ठिनो जगौ, भो श्रेष्ठिन्! अद्य मम विकृतियुतं भोजनं न कल्पते, मयाद्याचाम्लमेव कर्तव्यमस्ति, इति श्रुत्वा श्रेष्ठिना निर्विकृतिकं रुक्षान्नं तस्मै परिवेषितं. तन्मिताहारं विधाय प्रासुकं जलं च पीत्वा तेन तत्रैव स्थितेन चतुर्विधाहारप्रत्याख्यानं पुनः सूर्योदयावधि विहितं. एवं तं जैनधर्मकुशलं, क्रियापात्रं, पदे पदे च जीवयतनापरं विलोक्य तस्य तया मायया वंचितः श्रेष्ठी चिंतयामास, अहो! अयं धर्मात्मा युवा पुरुषो मम पुत्र्याः सुभद्रायाः परिणयनार्थं सर्वथा योग्योऽस्ति. यतः—जिनेंद्रधर्मवेत्तारं। दातारं विनयान्वितं ॥ कर्तारं यतनां सर्व—जीवेषु करुणान्वितं ॥ १ ॥ सरलं स्ववपूरूप—लक्ष्मीनिर्जित-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्मथं ॥ पुत्र्यर्थं विरला एव । लभंते वरमंगिनः ॥२॥ युग्मं ॥ इत्यादि विचिंत्य स्वहृदये प्रमुदितः स श्रेष्ठी तं बुद्धदासंप्रति प्राह, भो बुद्धदास! त्वं धर्मज्ञो गुणज्ञश्चासि, इयं मे कन्या सुभद्रा सांप्रतं यौवनाभिमुखा जातास्ति, ततो यदि त्वमेनामंगीकुर्यास्तदा लक्ष्मीकृष्णयोरिव, शशिरोहिण्योरिव युवयोरभिन्नप्रेमरसपूर्णः संबंधो भवेत्. एवंविधां श्रेष्ठिनः प्रार्थनां निशम्य निजहृदि हृष्टेन तेन बुद्धादासेनापि तदीयवचः स्वीकृतं. ततो नैमित्तिकैरादिष्टे निकटे शुभदिवसे श्रेष्ठिना महोत्सवपूर्वकं तेन बुद्धदासेन सह निजपुत्र्याः सुशीलायाः सुभद्राया विवाहो विहितः. एवं तां सुभद्रां परिणीय स तयासह विविधभोगविलासाननुभवन् स्थितः. कियद्दिनानंतरमुपार्जितभूरिद्रव्यः स बुद्धदासः सकलं श्वशुरादिवर्गमुत्कलाप्य स्वपुरंप्रति यियासुर्निजपत्न्या सुभद्रया सह ततः प्रस्थानमकरोत्. क्रमेण कुशलेन मार्गमुल्लंघयन् स स्वनगरे समेत्य मातापित्रोर्मिलितः. परमानंदं प्राप्ताभ्यां मातापितृभ्यामपि गृहे महोत्सवः कृतः. सुभद्रापि निजश्वश्रूपादयोः पतित्वा निजविनयं प्रकटीचकार, अथ द्वितीयदिने प्रातरुत्थाय सुभद्रा स्नानशुचीभूता जिनेंद्रभवने गत्वा जिनबिंबानि प्रणम्य, जैनमुनिभ्यश्चापि वंदनं विधाय गृहे समागता. तदा श्वश्रूस्तां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रति जगौ, वत्से ! अस्माकं कुले तु बुद्ध एव देव आराधनीयो विद्यते, अतस्त्वयाथो जिनमंदिरादिष्व-न्यत्र कुत्रापि न गंतव्यं. तत् श्रुत्वा वज्राहतेव दुःखितहृदया सा सुभद्रा दध्यौ, अहो ! कपटं विधाया-हमनेन भर्त्रा परिणीता, नूनमेष बोद्धधर्मानुयायी वर्तते, अथ किं कर्तव्यं ? परं यद्भावि तद्भवतु, मया तु निजहितमेवाचरणीयं, यतः—सर्वथा स्वहितमाचरणीयं । किं करिष्यति जनो बहुजल्पः ॥ विद्यते स न हि कश्चिदुपायः । सर्वलोकपरितोषकरो यः ॥ १ ॥ अथ श्वश्रूवचनमवगणय्य सा सुभद्रा तु जिनमं-दिरेषु जिनबिंबान्येव नंतुं प्रयाति. जैनमुनिभ्यश्च वंदनं विदधाति. एवं तां निजाज्ञामवगणयंतीं निरी-क्ष्येर्ष्याभिभूता श्वश्रूर्यथा तथा वदति, निरपराधां च तां विगोपयति. तद् दृष्ट्वा बुद्धदासेन सा निजप्रिया सुभद्रा पृथग्गृहे स्थापिता, तत्र च सुखं स्थिता सा जिनेंद्रं पूजयंती, जैनमुनींश्च प्रतिलाभयंती धर्मका-र्येष्वेव तत्परा बभूव. इतोऽन्यदा कश्चिज्जिनकल्पो जैनसाधुर्मासक्षपणपारणे एकाक्येव तस्याः सुभद्राया गृहे भिक्षार्थं समायातः. तं मुनींद्रं प्रतिलाभयंती सुभद्रा चक्षुःपतिततृणेन पीडयमानं विलोक्य विचा-रयामास, अहो अयं जिनकल्पविहारी मुनींद्रो निजचक्षुषस्तृणापकर्षणपराङ्मुखो वर्तते, इदं च तृणं चे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्य चक्षुषि स्थास्यति, तदास्य चक्षुर्गमिष्यत्येव. इति विचार्य तया सुभद्रया यतनापूर्वकं लाघवेन निजजिह्वया तस्य मुनेर्नेत्रात् तृणं कर्षितं, तदैवं कुर्वत्याश्च तस्या भालस्थमार्द्रकुंकुमतिलकं तस्य मुनेर्ललाटे लग्नं. स मुनिस्तु भिक्षां गृहीत्वा ततो निःसृतः. तदा कुंकुमतिलकांकितं मुनिभालं निरीक्ष्य छिद्रान्वेषणपरा तस्याः सुभद्रायाः श्वश्रूः साक्षाद्व्यंतरीव निजभुजावुल्लालयंती महता स्वरेण पूत्कारं कुर्वंती पारिवेश्मिकजनान् मेलयामास, निजपुत्रं बुद्धदासमपि तत्र समाहूय तं तिलकांकितं मुनिं दर्शयामास. एवं सा तां सुभद्रां विगोपयंती निजतनयं प्राह, वत्स! इदं तव वध्वा दुराचारं विलोकय? नूनमियं मुधैव निजात्मानं जैनधर्मपरं प्रकटयंती त्वां विप्रतार्यानेन साधुना सह विषयसेवनं करोति. इतस्तत्र सर्वमपि कुटुंबं मिलितं, वधूचेष्टितं च विलोक्य कुटुंबजनाः प्रोचुः, नूनमियं वधूः सुभद्रा स्वैरिणी कुलटैव विद्यते, अनयात्मनः कुलं कलंकितं. एवं कुटुंबादिजनप्रोक्तानि वाक्यानि निशम्य विलक्षीभूतो बुद्धदासोऽपि तस्यां विरक्तो जातः. एवं कुटुंबादिपारिवेश्मिकजनैर्निजभर्त्रा च विडंब्यमाना, तिरस्कृता च सुभद्रा दध्यौ, अहो! सांप्रतं मम पूर्वकृतं किमपि दुष्कृतं प्रकटीभूतं! यद्दिदं धर्मकार्यं कुर्वत्या ममोपरि-

मुधैवायं कलंकः चटितः, अथ किं करोमि? कुत्र वा यामि? मम धर्मस्यैव शरणमस्तु, इत्युक्त्वा सा दध्यौ, यावच्छासनदेवी मदीयमेतं कलंकं नोत्तारयिष्यति, तावन्मया कायोत्सर्गो न मोच्यः, इति ध्यात्वा सा सुभद्रा निश्चलमानसा निःकंपितशरीरा निजगृहमध्ये कायोत्सर्गध्याने तस्थौ. ततस्तस्याः सत्वसाहसेन संतुष्टा शासनदेवी प्रकटीभूय प्राह, हे वत्से! त्वं निर्दोषासि, अथ त्वं कायोत्सर्गं पारय? एवं शासनदेव्यादिष्टा सा सुभद्रा कायोत्सर्गं पारयित्वा तां देवींप्रति प्राह,भो मातः! यूयं मदीयमिमं कलंकं दूरीकुरुत? यथा जैनधर्मविगोपनं न स्यात्. तत् श्रुत्वा सा शासनदेवी जगौ, भो वत्से! त्वं खेदं मा कुरु? नूनं यथा प्रातस्तवायं कलंक उत्तरिष्यति, तथैवाहं करिष्यामि. अथ यथाहं गगनांगणस्था कथयामि, तथा त्वया कर्तव्यं, तत् श्रुत्वा सा सुभद्रा हृष्टा, शासनदेव्यप्यदृश्यतां प्राप्ता. अथ प्रातरुत्थाय यावन्नगरप्रतोलीपालकाः प्रतोलीरुद्घाटयंति, तावन्मनागपि चतसृणां प्रतोलीनां कपाटा नोद्घटंतिस्म. तत् श्रुत्वा निजहृदि चमत्कृतो नृपः स्वयं तत्रागत्य प्रतोलीद्वारमुद्घाटयितुमुद्यमं करोतिस्म. कृतबहुप्रयत्नोऽपि स नृपः कथमपि तदुद्घाटनसमर्थो न बभूव. ततः कोलाहलपराः सर्वेऽपि लोका व्या-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुला बभूवुः. राजादिभिर्लोकैर्मिलित्वा नानाविधानि विधिना शांतिकार्याणि कारितानि, तथापि प्रतोली-
कपाटाः कथंचिदपि नोद्घटिताः. ततो राजापि विलक्षोऽभूत्. इतो दिव्यप्रकाशपूर्वकं गगनमंडले समा-
गता शासनदेवी नृपादिसर्वलोकेभ्यः कथयामास, भो लोकाः! नगरमध्ये या स्त्री सती भविष्यति, सा
चेदामसूत्रतंतुनिबद्धया चालिन्या कूपमध्याज्जलमाकर्ष्य, तज्जलेन प्रतोलीकपाटानाच्छोटयिष्यति, तदैव
ते उद्घटिष्यंति, अन्यथा केनापि प्रकारेण नोद्घटिष्यंति. तत् श्रुत्वा नृपेण नगरमध्ये पटहोद्घोषणा
कारिता, या सती स्त्री देव्युक्तविधिना पुरप्रतोलीद्वारोद्घाटनं करिष्यति, तस्यै राजा भूरिसन्मानं दा-
स्यति. एवंविधां पटहोद्घोषणां निशम्यानेकपौरमहिला गर्वेण निजसतीत्वं मन्यमाना आमसूत्रतंतुनि-
बद्धाश्चालिनीर्गृहीत्वा कूपोपकंठं प्राप्ताः. क्रमेणैकैका सुंदरो तथाविधविधिना तत् कार्यं कर्तुं प्रवृत्ता, परं
तासां सर्वासां चालिनीबद्धाः सूत्रतंतव एव कूपोपकंठे त्रुटितुं लग्नाः, तदा कूपमध्याज्जलाकर्षणं तु दूर-
मेव स्थितं. एवं जनैर्विहस्यमानानां तासां स्त्रीणां कापि तत्कार्यकरणसमर्था नाभूत्. प्रांते तत्कार्यकरण-
सोद्यमा नृपराज्ञ्योऽपि निष्फलीभूतप्रयत्ना जाताः. तद् दृष्ट्वा नृपयुताः सर्वेऽपि लोकाः सचिंता अभवन्.



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इतः सा सुभद्रा निजश्वश्रूंप्रत्यवक्, हे मातः! यदि भवतीभ्यो रोचते, तदाहं पुरप्रतोलीकपाटोद्घाटनं करोमि. तत् श्रुत्वा राक्षसीव कोपाकुलहृदया सा जगाद, अरे! दुष्टे! भवत्याः सतीत्वं ह्यस्तनदिने एव मया च सर्वलोकैरपि ज्ञातमस्ति, तत्कलंकेन नूनमसंतुष्टेव सांप्रतं किं राजादीनामपि निजदुराचरणं दर्शयितुं समीहसे? निजोत्तरीयेण मुखमाच्छाद्य मूकीभूय गृहकोणे एव तिष्ट? अथ विशेषतः कुटुंबं मा कलंकय? एवं तया निर्भर्त्सितापि सुभद्रा श्वश्रूंप्रति सविनयं प्राह, हे मातः! भवतीभिः पूज्याभिर्यत्किंचिज्जल्प्यते, तत्प्रमाणं, मया चेत् प्रत्युत्तरो दीयते, तदा मम शोभा न भवेत्. ततो यदि भवतीभिरादेशो दीयते, तदाहं भवत्याः प्रसादान्नूनं पुरप्रतोलीकपाटानुद्घाटयिष्यामि. एवंविधां नम्रां विनयान्वितां च निजवधूवाचं निशम्याश्चर्यं प्राप्ता, किंचित् शांता च सा हृदये हसंती तिरस्कारपूर्वकं प्राह, अरे! यद्येवं दुराचारपरापि निजात्मनि सतीत्वं मन्यमानासि, तर्हि द्रुतं पुरप्रतोलीकपाटानुद्घाटय? यथा ते शुद्धं सतीत्वं पश्यामः. एवं सहास्यव्यंग्योक्त्यापि तस्या अनुमतिं समवाप्य सुभद्रया स पटहः स्पृष्टः. ततः स्नातपरिहितनिर्मलवस्त्रा सुभद्रा कौतुकार्थिश्वश्रूप्रभृतिपौरनारीगणपरिवृता, सवि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मयं नृपादिपौरव्रजैश्च निरीक्ष्यमाणा कूपोपकंठं प्राप्ता. ततस्तया पंचपरमेष्ठिनमस्कारं स्मृत्वा, शासनदेवीं च हृदये ध्यात्वा, आमसूत्रतंतुभिश्चालिनीं बध्ध्वा कूपे च निःक्षिप्य ततो जलमाकर्षितं. तदा न च सूत्रतंतवस्त्रुटिताः, न च चालिन्या बिंदुमात्रमपि जलं गलितं. राजादयः सर्वलोकाश्चाश्चर्यशंकुना कीलिता इव स्तंभीभूता विस्फारितनयना विलोकमाना एव तत्र स्थिताः. तस्याः श्वश्रूरपि विलक्षीभूय श्यामानना तत्सर्वं विलोकयामास. ततो जलभृतां तां चालिनीं निजहस्ते धृत्वा नरनारीगणैः परिवृता, सुवासिनीभिर्गीयमानगुणा सा सुभद्रा पुरप्रतोलींप्रति चचाल. तत्रागत्य स्मृतपंचनमस्कारासौ तच्चालिनीतोंजलिना जलमादाय यावत् प्रतोलीकपाटानाच्छोटयति, तावत्तूर्णमेव द्वावपि कपाटौ स्वयमेव तादृक्कृत्योद्घटितौ, प्रहृष्टैः पौरगणैश्च जयजयारावपूर्वकं तंडुलपुष्पादिभिः सा वर्धापिता. अथैवं तया महासत्या सुभद्रया प्रतोलीत्रयकपाटास्तथैव विधिनोद्घाटिताः, ततो गगनांगणस्थितया शासनदेव्या प्रकटीभूय नृपादिपौरसमक्षं सुभद्रायै प्रोक्तं, भो वत्से ! अथैवंविधा या काचित् सतीत्वगर्वमंडिता ललना भविष्यति, सा चतुर्थीप्रतोलीकपाटावुद्घाटयतु, परमद्यापि कयापि तौ कपाटावनुद्घाटितावेव तत्पुरे दृश्येते. ततः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तया शासनदेव्या लोकेभ्यः प्रोक्तं, यः कोऽप्यस्या सुभद्रायाः सत्या विरुद्धं चिंतयिष्यति करिष्यति वा, तस्य मया शिक्षा दास्यते. ततोऽवनीपतिप्रमुखः सर्वोऽपि जनो निजचेतसि चमत्कृतस्तस्याः संतोत्वं स्तुवन् जैनधर्मं स्वीचकार. श्वश्रूरप्युत्थाय तां निजवधूं क्षमयामास. सुभद्रा तु गर्वलेशमप्यदधाना श्वश्रूं नमतिस्म. बुद्धदासादिसकलोऽपि कुटुंबजनो बौद्धधर्मं परिहृत्य जैनधर्मपरायणो बभूव. कियत्कालमेवं सुखेन गार्हस्थ्यधर्मं परिपाल्य सा सुभद्रा सती गुरुपार्श्वे दीक्षां गृहीत्वा, क्रमेण तीव्रतपोऽग्निना निजकर्मेंधनानि प्रज्वाल्य मुक्तिपुरीं ययौ.

॥ इति श्रीसुभद्राचरित्रं समाप्तं ॥ श्रीरस्तु ॥

आ चरित्र श्रीशुभशीलगणीजीए रचेला कथाकोष नामना ग्रंथमांथी उद्धरीने तेनी मूलभाषामां सुधारो वधारो करी जामनगरवाळा पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय प्रेसमां स्वपरना श्रेयने माटे छापी प्रसिद्ध करेल छे ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तद्दन सरल तेमज संस्कृत ज्ञांन
साधारण जाणनारने पण
उपयोगी थइपडे तेवा
गद्यबद्ध.

पत्रकारे तद्दन नवीन ग्रंथो तैयार छे.
शुभशीलगणीकृत.

| | | |
|---|---|---|
| मदनरेखाचरित्र गद्य | .... | ....रु. ०॥। |
| स्कंदकाचार्यचरित्र पद्य | | ....रु. ०॥ |
| राजीमतिचरित्र गद्य | .... | ....रु. ०॥ |
| अतिमुक्तचरित्र गद्य | .... | ....रु. ०॥= |
| श्रीयकमुनिचरित्र" | | ....रु. ०॥ |
| मेतार्यमुनिचरित्र " | | ....रु. ०॥ |
| आर्द्रकुमारचरित्र " | .... | ....रु. १) |
| चदनबालाचरित्र " | .... | ....रु. ०॥। |
| गजसुकुमालचरित्र" | | ....रु. ०॥≥ |
| नागदत्तचरित्र " | | ....रु. ०॥= |
| अग्निकापुत्रचरित्र " | .... | ....रु. ०॥ |
| नंदिषेणमुनिचरित्र " | ... | ....रु. ०॥ |
| सुभद्राचरित्र " | | ०॥ |
| सुदर्शनश्रेष्ठिचरित्र " | " | ....रु. ०। |
| नर्मदासुंदरीचरित्र" | " | ....रु. १) |
| विष्णुकुमारमुनिचरित्र | " | ....रु. ०॥ |
| चेल्लणामहासतिचरित्र | " | ....रु. ०॥ |

लखो–पंडित हीरालाल हंसराज. जामनगर.



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

મુનિશ્રી નીતિવિજયજી જ્ઞાન ભંડાર.

॥ इति श्रीसुभद्राचरित्रं समाप्तम् ॥

મુનિશ્રી નીતિવિજયજી જ્ઞાન ભંડાર.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust